# ॥ શ્રીકુલકુણ્ડલીકવચસ્તોત્રમ્ અથવા કન્દવાસિનીકવચમ્ ॥

.. ShrI Kulakundali or Kandavasini Kavacha Stotram ..

sanskritdocuments.org

August 20, 2017

# .. ShrI Kulakundali or Kandavasini Kavacha Stotram ..

# ॥ શ્રીકુલકુણ્ડલીકવચસ્તોત્રમ્ અથવા કન્દવાસિનીકવચમ્ ॥

## Sanskrit Document Information

Text title : kulakuNDalIkavacham

File name : kulakuNDalIkavacham.itx

Category : kavacha, devii, ShaTchakrashakti

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay, PSA Easwaran psaeaswaran at gmail.com

Description-comments : RudrayAmale utaratantre siddhividyAprakaraNe

Latest update : July 5, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીકુલકુણ્ડલીકવચસ્તોત્રમ્ અથવા કન્દવાસિનીકવચમ્ ॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીઉમામહેશ્વરાભ્યાં નમઃ ॥

॥ શ્રીગુરવે નમઃ ॥

આનન્દભૈરવી ઉવાચ ।
અથ વક્ષ્યે મહાદેવ કુણ્ડલીકવચં શુભમ્ ।
પરમાનન્દદં સિદ્ધં સિદ્ધવૃન્દનિષેવિતમ્ ॥ ૧॥

યત્કૃત્વા યોગિનઃ સર્વે ધર્માધર્મપ્રદર્શકાઃ ।
જ્ઞાનિનો માનિનો ધર્માન્ વિચરન્તિ યથામરાઃ ॥ ૨॥

સિદ્ધયોઽપ્યણિમાદ્યાશ્ચ કરસ્થાઃ સર્વદેવતાઃ ।
એતત્કવચપાઠેન દેવેન્દ્રો યોગિરાડ્ભવેત્ ॥ ૩॥

ઋષયો યોગિનઃ સર્વે જટિલાઃ કુલભૈરવાઃ ।
પ્રાતઃકાલે ત્રિવારં ચ મધ્યાહ્ને વારયુગ્મકમ્ ॥ ૪॥

સાયાહ્ને વારમેકન્તુ પઠેત્કવચમેવ ચ ।
પઠેદેવં મહાયોગી કુણ્ડલીદર્શનં ભવેત્ ॥ ૫॥

ૐ અસ્ય શ્રીકુલકુણ્ડલીકવચસ્ય બ્રહ્મેન્દ્ર ઋષિઃ ।
ગાયત્રી છન્દઃ । કુલકુણ્ડલી દેવતા । સર્વાભીષ્ટસિદ્ધ્યર્થે વિનિયોગઃ ।

ૐ ઈશ્વરી જગતાં ધાત્રી લલિતા સુન્દરી પરા ।
કુણ્ડલી કુલરૂપા ચ પાતુ માં કુલચણ્ડિકા ॥ ૬॥

શિરો મે લલિતા દેવી પાતૂગ્રાખ્યા કપોલકમ્ ।
બ્રહ્મમન્ત્રેણ પુટિતા ભ્રૂમધ્યં પાતુ મે સદા ॥ ૭॥

નેત્રત્રયં મહાકાલી કાલાગ્નિભક્ષિકા શિખામ્ ।
દન્તાવલીં વિશાલાક્ષી ઓષ્ઠમિષ્ટાનુવાસિની ॥ ૮॥

કામબીજાત્મિકા વિદ્યા અધરં પાતુ મે સદા ।
ળયુગસ્થા ગણ્ડયુગ્મં માયા વિશ્વા રસપ્રિયા ॥ ૯॥

ભુવનેશી કર્ણયુગ્મં ચિબુકં ક્રોધકાલિકા ।

કપિલા મે ગલં પાતુ સર્વબીજસ્વરૂપિણી ॥ ૧૦॥

માતૃકાવર્ણપુટિતા કુણ્ડલી કણ્ઠમેવ ચ ।
હૃદયં કાલપૃથ્વી ચ કઙ્કાલી પાતુ મે મુખમ્ ॥ ૧૧॥

ભુજયુગ્મં ચતુર્વર્ગા ચણ્ડદોર્દ્દણ્ડખણ્ડિની ।
સ્કન્ધયુગ્મં સ્કન્દમાતા હાલાહલગતા મમ ॥ ૧૨॥

અઙ્ગુલ્યગ્રં કુલાનન્દા શ્રીવિદ્યા નખમણ્ડલમ્ ।
કાલિકા ભુવનેશાની પૃષ્ઠદેશં સદાવતુ ॥ ૧૩॥

પાર્શ્વયુગ્મં મહાવીરા વીરાસનધરાભયા ।
પાતુ માં કુલદર્ભસ્થા નાભિમુદરમમ્બિકા ॥ ૧૪॥

કટિદેશં પીઠસંસ્થા મહામહિષઘાતિની ।
લિઙ્ગસ્થાનં મહામુદ્રા ભગં માલામનુપ્રિયા ॥ ૧૫॥

ભગીરથપ્રિયા ધૂમ્રા મૂલાધારં ગણેશ્વરી ।
ચતુર્દલં કક્ષ્યપૂજ્યા દલાગ્રં મે વસુન્ધરા ॥ ૧૬॥

શીર્ષં રાધા રણાખ્યા ચ બ્રહ્માણી પાતુ મે મુખમ્ ।
મેદિની પાતુ કમલા વાગ્દેવી પૂર્વગં દલમ્ ॥ ૧૭॥

છેદિની દક્ષિણે પાતુ પાતુ ચણ્ડા મહાતપા ।
ચન્દ્રઘણ્ટા સદા પાતુ યોગિની વારુણં દલમ્ ॥ ૧૮॥

ઉત્તરસ્થં દલં પાતુ પૃથિવીમિન્દ્રપાલિતા ।
ચતુષ્કોણં કામવિદ્યા બ્રહ્મવિદ્યાબ્જકોણકમ્ ॥ ૧૯॥

અષ્ટશૂલં સદા પાતુ સર્વવાહનવાહના ।
ચતુર્ભુજા સદા પાતુ ડાકિની કુલચઞ્ચલા ॥ ૨૦॥

મેઢ્રસ્થા મદનાધારા પાતુ મે ચારુપઙ્કજમ્ ।
સ્વયમ્ભૂલિઙ્ગ ચાર્વાકા કોટરાક્ષી મમાસનમ્ ॥ ૨૧॥

કદમ્બવનમાપાતુ કદમ્બવનવાસિની ।
વૈષ્ણવી પરમા માયા પાતુ મે વૈષ્ણવં પદમ્ ॥ ૨૨॥

ષડ્દલં રાકિણી પાતુ રાકિણી કામવાસિની ।
કામેશ્વરી કામરૂપા શ્રીકૃષ્ણં પીતવાસસમ્ ॥ ૨૩॥

વનમાલા વનદુર્ગા શઙ્ખં મે શઙ્ખિની શિવા ।
ચક્રં ચક્રેશ્વરી પાતુ કમલાક્ષી ગદાં મમ ॥ ૨૪॥

પદ્મં મે પદ્મગન્ધા ચ પદ્મમાલા મનોહરા ।
રાદિલાન્તાક્ષરં પાતુ લાકિની લોકપાલિની ॥ ૨૫॥ (કાદિલાન્તાક્ષરં)
ષડ્દલે સ્થિતદેવાંશ્ચ પાતુ કૈલાસવાસિની । (ષડ્વર્ગસ્થિતદેવીશ્ચ)
અગ્નિવર્ણા સદા પાતુ ગણં મે પરમેશ્વરી ॥ ૨૬॥

મણિપૂરં સદા પાતુ મણિમાલાવિભૂષણા ।
દશાપત્રં દશવર્ણં ડાદિફાન્તં ત્રિવિક્રમા ॥ ૨૭॥

પાતુ નીલા મહાકાલી ભદ્રા ભીમા સરસ્વતી ।
અયોધ્યાવાસિની દેવી મહાપીઠનિવાસિની ॥ ૨૮॥

વાગ્ભવાદ્યા મહાવિદ્યા કુણ્ડલી કાલકુણ્ડલી ।
દશચ્છદગતં પાતુ રુદ્રં રુદ્રાત્મકં મમ ॥ ૨૯॥

સૂક્ષ્માત્સૂક્ષ્મતરા પાતુ સૂક્ષ્મસ્થાનનિવાસિની ।
રાકિણી લોકજનની પાતુ કૂટાક્ષરસ્થિતા ॥ ૩૦॥

તૈજસં પાતુ નિયતં રજકી રાજપૂજિતા ।
વિજયા કુલબીજસ્થા તવર્ગં તિમિરાપહા ॥ ૩૧॥

મન્ત્રાત્મિકા મણિગ્રન્થિભેદિની પાતુ સર્વદા ।
ગર્ભદાતા ભૃગુસુતા પાતુ માં નાભિવાસિની ॥ ૩૨॥

નન્દિની પાતુ સકલં કુણ્ડલી કાલકમ્પિતા ।
હૃત્પદ્મં પાતુ કાલાખ્યા ધૂમ્રવર્ણા મનોહરા ॥ ૩૩॥

દલદ્વાદશવર્ણં ચ ભાસ્કરી ભાવસિદ્ધિદા ।
પાતુ મે પરમા વિદ્યા કવર્ગં કામચારિણી ॥ ૩૪॥

ચવર્ગં ચારુવસના વ્યાઘ્રાસ્યા ટઙ્કધારિણી ।
ચકારં પાતુ કૃષ્ણાખ્યા કાકિનીં પાતુ કાલિકા ॥ ૩૫॥

ટકુરાઙ્ગી ટકારં મે જીવભાવા મહોદયા ।
ઈશ્વરી પાતુ વિમલા મમ હૃત્પદ્મવાસિની ॥ ૩૬॥

કર્ણિકાં કાલસન્દર્ભા યોગિની યોગમાતરમ્ ।
ઇન્દ્રાણી વારુણી પાતુ કુલમાલા કુલાન્તરમ્ ॥ ૩૭॥

તારિણી શક્તિમાતા ચ કણ્ઠવાક્યં સદાવતુ ।
વિપ્રચિત્તા મહોગ્રોગ્રા પ્રભા દીપ્તા ઘનાસના ॥ ૩૮॥

વાક્સ્તમ્ભિની વજ્રદેહા વૈદેહી વૃષવાહિની ।
ઉન્મત્તાનન્દચિત્તા ચ ક્ષણોશીશા ભગાન્તરા ॥ ૩૯॥

મમ ષોડશપત્રાણિ પાતુ માતૃતનુસ્થિતા ।   (માતુલસંસ્થિતા)
સુરાન્ રક્ષતુ વેદજ્ઞા સર્વભાષા ચ કર્ણિકામ્ ॥ ૪૦॥

ઈશ્વરાર્ધાસનગતા પ્રપાયાન્મે સદાશિવમ્ ।
શાકમ્ભરી મહામાયા સાકિની પાતુ સર્વદા ॥ ૪૧॥

ભવાની ભવમાતા ચ પાયાદ્ભ્રૂમધ્યપઙ્કજમ્ ।
દ્વિદલં વ્રતકામાખ્યા અષ્ટાઙ્ગસિદ્ધિદાયિની ॥ ૪૨॥

પાતુ નાસામખિલાનન્દા મનોરૂપા જગત્પ્રિયા ।
લકારં લક્ષણાક્રાન્તા સર્વલક્ષણલક્ષણા ॥ ૪૩॥

કૃષ્ણાજિનધરા દેવી ક્ષકારં પાતુ સર્વદા ।
દ્વિદલસ્થં સર્વદેવં સદા પાતુ વરાનના ॥ ૪૪॥

બહુરૂપા વિશ્વરૂપા હાકિની પાતુ સંસ્થિતા ।
હરાપરશિવં પાતુ માનસં પાતુ પઞ્ચમી ॥ ૪૫॥

ષટ્ચક્રસ્થા સદા પાતુ ષટ્ચક્રકુલવાસિની ।
અકારાદિક્ષકારાન્તા બિન્દુસર્ગસમન્વિતા ॥ ૪૬॥

માતૃકાણાં સદા પાતુ કુણ્ડલી જ્ઞાનકુણ્ડલી ।
દેવકાલી ગતિપ્રેમા પૂર્ણા ગિરિતટં શિવા ॥ ૪૭॥

ઉડ્ડીયાનેશ્વરી દેવી સકલં પાતુ સર્વદા ।
કૈલાસપર્વતં પાતુ કૈલાસગિરિવાસિની ॥ ૪૮॥

પાતુ મે ડાકિનીશક્તિર્લાકિની રાકિણી કલા ।
સાકિની હાકિની દેવી ષટ્ચક્રાદીન્ પ્રપાતુ મે ॥ ૪૯॥

કૈલાસાખ્યં સદા પાતુ પઞ્ચાનનતનૂદ્ભવા ।

હિરણ્યવર્ણા રજની ચન્દ્રસૂર્યાગ્નિભક્ષિણી ॥ ૫૦॥

સહસ્રદલપદ્મં મે સદા પાતુ કુલાકુલા ।
સહસ્રદલપદ્મસ્થા દૈવતં પાતુ ખેચરી ॥ ૫૧॥

કાલી તારા ષોડશાખ્યા માતઙ્ગી પદ્મવાસિની ।
શશિકોટિગલદ્રૂપા પાતુ મે સકલં તમઃ ॥ ૫૨॥

વને ઘોરે જલે દેશે યુદ્ધે વાદે શ્મશાનકે ।
સર્વત્ર ગમને જ્ઞાને સદા માં પાતુ શૈલજા ॥ ૫૩॥

પર્વતે વિવિધાયાસે વિનાશે પાતુ કુણ્ડલી ।
પાદાદિબ્રહ્મરન્ધ્રાન્તં સર્વાકાશં સુરેશ્વરી ॥ ૫૪॥

સદા પાતુ સર્વવિદ્યા સર્વજ્ઞાનં સદા મમ ।
નવલક્ષમહાવિદ્યા દશદિક્ષુ પ્રપાતુ મામ્ ॥ ૫૫॥

ઇત્યેતત્કવચં દેવિ કુણ્ડલિન્યાઃ પ્રસિદ્ધિદમ્ ।
યે પઠન્તિ ધ્યાનયોગે યોગમાર્ગવ્યવસ્થિતાઃ ॥ ૫૬॥

તે યાન્તિ મુક્તિપદવીમૈહિકે નાત્ર સંશયઃ ।
મૂલપદ્મે મનોયોગં કૃત્વા હૃદાસનસ્થિતઃ ॥ ૫૭॥

મન્ત્રં ધ્યાયેત્કુણ્ડલિનીં મૂલપદ્મપ્રકાશિનીમ્ ।
ધર્યોદયાં દયારુઢામાકાશસ્થાનવાસિનીમ્ ॥ ૫૮॥

અમૃતાનન્દરસિકાં વિકલાં સુકલાં શિતામ્ ।
અજિતાં રક્તરહિતાં વિશક્તાં રક્તવિગ્રહામ્ ॥ ૫૯॥

રક્તનેત્રાં કુલક્ષિપ્રાં જ્ઞાનાઞ્જનજયોજ્જ્વલામ્ ।
વિશ્વાકારાં મનોરૂપાં મૂલે ધ્યાત્ત્વા પ્રપૂજયેત્ ॥ ૬૦॥

યો યોગી કુરુતે એવં સ સિદ્ધો નાત્ર સંશયઃ ।
રોગી રોગાત્પ્રમુચ્યેત બદ્ધો મુચ્યેત બન્ધનાત્ ॥ ૬૧॥

રાજ્યં શ્રિયમવાપ્નોતિ રાજ્યહીનઃ પઠેદ્યદિ ।
પુત્રહીનો લભેત્પુત્રં યોગહીનો ભવેદ્વશી ॥ ૬૨॥

કવચં ધારયેદ્યસ્તુ શિખાયાં દક્ષિણે ભુજે ।
વામા વામકરે ધૃત્ત્વા સર્વાભીષ્ટમવાપ્નુયાત્ ॥ ૬૩॥

સ્વર્ણે રૌપ્યે તથા તામ્રે સ્થાપયિત્ત્વા પ્રપૂજયેત્ ।
સર્વદેશે સર્વકાલે પઠિત્વા સિદ્ધિમાપ્નુયાત્ ॥ ૬૪॥

સ ભૂયાત્કુણ્ડલીપુત્રો નાત્ર કાર્યા વિચારણા ॥ ૬૫॥

॥ ઇતિ શ્રીરુદ્રયામલે ઉત્તરતન્ત્રે મહાતન્ત્રોદ્દીપને સિદ્ધિવિદ્યાપ્રકરણે
ષટ્ચક્રપ્રકાશે ભૈરવીભૈરવસંવાદે કન્દવાસિનીકવચં
અથવા કુલકુણ્ડલિનીકવચં સમ્પૂર્ણમ્ ॥

Encoded by Gopal Upadhyay gopal.j.upadhyay at gmail.com
Proofread by Gopal Upadhyay, PSA Easwaran psaeaswaran at gmail.com

.. ShrI Kulakundali or Kandavasini Kavacha Stotram ..
Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*